This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 174 विषय वैदिक

नाव. गृह्यसूत्र (MSS)

लेखक/लिपीकार —

पृष्ठ 29 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ·सू

॥श्री॥ अथ गृह्यसूत्रप्रारंभः॥ हरिः ॐ म्र॥ सिताराम॥

हेरंबु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ॰सू॰ विश्वेभ्यो देवेभ्यः सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवा नक्तं चारिभ्य
२ इति नक्तं रक्षोभ्य इत्युत्तरतः स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षि
णा निनयेत् ॥ २ ॥ अथ गृहबलिदेवतानां कीर्तयिष्यामो यत्र य
त्र वसन्दिते ॥ द्वारे पितामहं विद्यात्सक्री केचदुमापतिं ॥ आग्नेयां ब
लिभद्रं च यमं विष्णुं च दक्षिणे ॥ नैर्ऋत्यां स्कन्दवर्णं च सोमं सूर्यं च
पश्चिमे ॥ वायव्यामश्विनौ वसवः सोमो रुद्र उत्तरस्यां दिशि ॥ ई
शान्यां नक्षत्राणीन्द्र गृहाः पूर्वस्यां दिशि ॥ गृहमध्ये ब्रह्माणं प्र
तिष्ठाप्यत्तधिर्ष्ट्यो श्रियाकीर्तिरिति सततस्मात्तं बलित्रयं गृहा राम
गणे देयं विहितं ये भूतानि चरन्ति दिवा नक्तं न ल्विमिच्छन्तो विदुरस्य २
प्रेप्साः ॥ तेभ्यो बलिं पुष्टिकामो ददामि मयि पुष्टिं पुष्टिपतिर्ददातु स्वा

हा ॥ ऐन्द्रवारुणवायव्यायाम्यां नैर्ऋत्काश्यपे ॥ तेकाका भ्माति गृण्हं
तु भूम्यां पिण्डं मयार्पितं ॥ वैवस्वतकुले जातौ द्वौ श्यामशबलौ शुनौ
॥ ताभ्यां पिण्डो मया दत्तो रक्षेथां पथि मां सदा ॥ यमोसि यमदूतो
सि वायसोसि नमोस्तु ते ॥ सप्तजन्मकृतं पापं बलिभक्षं तु वाय
सः ॥ कृमिकीटपतङ्गानां जन्तूनां पापचारिणां ॥ ते सर्वे तृप्तिमा
यान्तु मया दत्तेन भूतले ॥ श्वडो चांडलभूतपतित वायसेभ्योनं
भूमौ निक्षिपेत् ॥ गोदोहनमात्रं तत्र स्थित्वा अतिथिमाकांक्षेत् ॥
हस्तौ पादौ प्रक्षाल्याचम्य गृहं प्रवेशयेत् ॥ शान्ता पृथिवी शिवमं
तरिक्षं द्यौ नो देव्यभयन्नो अस्तु ॥ शिवा दिशः प्रदिश उद्दिशो न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ.सू. आपोविद्युतः परिपांतु सर्वतः शांतिः शांतिः शांतिः ॥ २ ॥ अथ
३ खलुयत्रक्वचहोष्यंत्स्यादिषुमात्रावरं सर्वतः स्थंडिलमुपलि
प्योल्लिख्यषड्रेखाउदगायतां पश्चात्प्रागायतेनानांतयोस्ति
स्रोमध्येतदभ्युक्ष्याग्निं प्रतिष्ठाप्यान्वाधायपरिसमुह्यपरिस्ती
र्यपुरस्ताद्दक्षिणतः पश्चादुत्तरतइत्युदक्संस्थंतूष्णीं पर्यु
क्षणंपवित्राभ्यामाज्यस्योत्पवनं प्रेमे छिन्नामावनं तर्गर्भौ
प्रादेशमात्रौकुशौनानांतयोर्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्या
मुत्तानाभ्यांपाणिभ्यां सवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेण

पवित्रेणवसोः सूर्यस्यरश्मिभिरितिप्रागुत्पुनातिसकृन्मंत्रेणद्विस्तूष्णीं
कृताकृतमाज्यहोमेषुपरिस्तरणं तथाज्यभागौपाकयज्ञेषुब्रह्माच
पन्वंतरियज्ञश्शूलगवबर्ज्ममुष्मैस्वाहेतिजुहुयादग्निरिंद्रःप्रजापतिर्विश्वे
देवाब्रह्मेत्यनादेशाएकबर्हिरिध्माज्यस्विष्टकृतस्युस्तुल्यकालास्तदे
षाभिऽयज्ञगाथागीयते॥ वपाकप्यज्ञांत्समासाद्यैकाज्यानेकव
र्हिषः॥ एकस्विष्टकृतःकुर्यान्नानापिसतिदैवतइति॥ ३॥ उदगयन
आपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मोपनयनगोदानविवा
हाःसार्वकालमेकेविवाहंतेषांपुरस्ताच्चतस्रआज्याहुतीर्जुहुयाद
इति ग्नआयूंषिपवस्वेतितिसृभिः प्रजापतेनत्वदेतान्यन्यइतिचव्याहृति
भिर्वासमस्तव्यमेकेनैकेकांचनेनत्वमयमाभवस्त्रियत्केनीनामेतिवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वहेच्चतुर्थीं ॥४॥ कुलमग्नेपरीक्षेतयेमातृतःपितृतश्चेतियथोक्तं
ग.८ पुरस्ताद्बुद्धिमतेकन्यांप्रयच्छेद्बुद्धिरूपशीललक्षणसंपन्नामरोगा
४ मुपयच्छेत दुर्विज्ञेयानिलक्षणानीत्यष्टौपिंडान्कृत्वाऋतमग्रेप्रथमं
जज्ञेऋतेसत्यंप्रतिष्ठितं ॥ यदियंकुमार्यभिजातातदियमिह प ५
प्रतिपद्यतांयत्सत्यंतद्दृश्यतामितिपिंडानभिमंत्र्यकुमारींब्रूयादेषा
मेकंगृहाणेतिक्षेत्राच्चेदुभयतःसस्याद्गृह्णीयादन्नवत्यस्याःप्रजा
भविष्यतीतिविद्याद्गोष्ठात्पशुमतीवेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदा राम
सिनोह्रदात्सर्वसंपन्नादेवनात्कितवीचतुष्पथाद्द्विप्रव्राजिनी ५
रिणाद्धन्याश्मशानात्पतिघ्नी ॥५॥ अलंकृत्यकन्यामुदकपू
र्वांदद्यादेषब्राह्मोविवाहस्तस्यांजातोद्वादशावरान्द्वादशपरान्

पुनात्युभयतऋत्विजेवितते कर्मणिदद्यादलंकृत्यसदैवोदशावरान्दश
परान्पुनात्युभयतःसहसहधर्मंचरतइतिप्राजापत्योऽष्टावरानष्ट
परान्पुनात्युभयतोगोमिथुनंदत्त्वोपयच्छेतसआर्षःसप्तावरान्
सप्तपरान्पुनात्युभयतोमिथःसमयंकृत्वोपयच्छेतसगां
धर्वोधनेनोपतोष्योपयच्छेतसआसुरःसुप्तानांप्रमत्तानांवा
पहरेत्सपैशाचोहत्वाभित्त्वाचशीर्षाणिरुदतींरुदद्भ्योहरेत्सरा
क्षसः ॥६॥ अथखल्वुच्चावचाजनपदधर्माग्रामधर्माश्चतान्
विवाहेप्रतीयाद्यत्तुसमानंतद्वक्ष्यामःपश्चादग्नेर्दृषदमश्
मानंप्रतिष्ठाप्योत्तरपुरस्तादुदकुंभंसमन्वारब्धायांहुतायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰सू॰ तिष्ठन्प्रत्यङ्मुखः प्राङ्मुख्या आसीनाया गृभ्णामि ते सौभगत्वाय
५ हस्तमित्यङ्गुष्ठमेव गृह्णीयाद्यदि कामयीत पुमांस एव मे
पुत्रा जायेरन्नित्यङ्गुलीरेव । स्त्रीकामो रोमान्ते हस्तं साङ्गुष्ठमुभयकामः ॥
प्रदक्षिणमग्निमुदकुम्भं च त्रिः परिणयञ्जपत्यमोऽहमस्मि सा त्वं सा त्व
मस्यमोऽहं द्यौरहं पृथिवी त्वं सामाहमृक्त्वं तावेहि विवहावहै ॥ ६ ॥
प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः
शतमिति परिणीय परिणीयाश्मानमारोहयति ममश्मानमारो
हाश्मेव त्वं स्थिरा भव ॥ सहस्व पृतनायतोऽभितिष्ठ पृतन्यत इति
वध्वञ्जलावुपस्तीर्य भ्राता भ्रातृस्थानो वा द्विर्लाजानावपति त्रि राम
र्जामदग्न्यानां प्रत्यभिघार्य हविरवत्तं चैषो वृदाय धर्मो यमर्यमणं नु दे ५
वं कन्या अग्निमयक्षत ॥ स इमां देवो अर्यमा प्रेतो मुञ्चातु नामु

तः स्वाहा ॥ वरुणं नु देवं कन्या अग्निमयक्षत ॥ स इमां देवो वरुणः प्रे
तो मुञ्चातु नामुतः स्वाहा ॥ पूषणं नु देवं कन्या अग्निमयक्षत ॥ स इ
मां देवः पूषा प्रेतो मुञ्चातु नामुतः स्वाहेत्यविच्छिन्दत्यञ्जलिं स्रुचेव जु
हुयादपरेणाग्निं च शूर्पपुटेनाभ्यात्मं तूष्णीं चतुर्थमोप्य हैके लाजा
न्परिणयन्ति तथोत्तमे आहुती न संनिपततोऽथास्यै शिखे विमुं
चति यदि कृते भवत ऊर्णास्तुके केशपक्षयोर्बद्धे भवतः प्र त्वा मु
ञ्चामि वरुणस्य पाशादित्युत्तरामुत्तरयाथैनामपराजितायां दि
शि सप्तपदान्यभ्युत्क्रामयत्येकमिष ऊर्जे द्विपदी रायस्पोषाय
त्रिपदी मायोभव्याय चतुष्पदी प्रजाभ्यः पञ्चपदी ऋतुभ्यः षट्पदी स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰सू॰ खासप्तपदीभवसामामनुव्रताभव॥ पुत्रान्विंदावहैबहूंस्तेसंतुजर
८ दष्टयइत्युभयोस्संनिधायशिरसीउदकुंभेनावसिंच्येब्राह्मण्या
श्चवृद्धाया॥ जीवपत्न्या जीवप्रजाया अगारएतांरात्रींवसेध्रुवमरुंध॥
तीसप्तऋषीनितिदृष्ट्वावाचंविसृजेतजीवपत्नीप्रजां॥ विंदेयेति॥७॥
प्रयाणउपपद्यमानेपूषात्वेतोनयतुहस्तगृह्येतियानमारोहयेदश्म
न्वतीरीयतेसरभध्वमित्यर्धर्चेननावमारोहयेदुत्तरणे॥ अमयै
जीवंरुदंतीति रुदत्यो विवाहाग्निमग्रतोऽजस्रंनयंतिकल्या राम
जपे णेषुदेशेषुवृक्षेचतुष्पथेषुमाविदन्परिपंथिनइतिवाससेवासेसुमंगली॥ ८
रियंवधूरितीक्षकानीक्षेतेह प्रियंप्रजायातेसमृध्यतामितिगृ
हंप्रवेशयेद्विवाहाग्निमुपसमाधायपश्चादस्यानडुह

नर्मास्तीर्यप्राग्ग्रीवमुत्तरलोमत॥ स्मिनुपविष्टायांसमन्वारब्धाया
मानःप्रजांजनयतुप्रजापतिरितिचतसृभिःप्रत्यृचंहुत्वास
मंजंतुविश्वेदेवाइतिदध्नःप्राश्यप्रतिप्रयच्छेदाज्यशेषेणवानक्ति
हृदयेततऊर्ध्वमक्षारालवणाशिनौब्रह्मचारिणावलंकुर्वाणौ॥ व
धःशायिनोस्यातांत्रिरात्रंद्वादशरात्रंसंवत्सरंवैकऋषिर्जा
यतइतिचरितव्रतःसूर्याविदेवधूवस्त्रंदद्यादन्नंब्राह्मणेभ्यो
थस्वस्त्ययनंवाचयीत॥ ८॥ पाणिग्रहणादिगृह्यंपरिचरेत्स्वयं
पत्न्यपिवापुत्रःकुमार्यंतेवासीवा॥ नित्यानुगृहीतस्याद्यदिस्तू
पत्न्यास्यपिसत्युपवसेदित्येकेतस्याग्निहोत्रेणप्रादुष्करणहोम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थंडिर

गृ.सू. का(ल)नौ व्याहृतीभिर्व्या होमं यं च मांसवर्जं कामं तु व्रीहियवतिलैरग्नये
स्वाहेति सायं जुहुयात् सूर्याय स्वाहेति प्रातस्तू[illegible]तीये उभयत्र
॥१॥ अथ पार्वणस्थालीपाकस्तस्यैतदे पूर्णमासाभ्यामुपवास इध्मा
बर्हिषोश्च सन्नहनं देवताश्चोपांशुयाजे इंद्रमहेंद्रवर्जं काम्या इतरा
स्तस्यैतस्यै देवतायै चतुरश्चतुरो मुष्टीन्निर्वपति पवित्रे अंतर्धायामुष्मै त्वा
जुष्टं निर्वपामीत्यथैनान्प्रोक्षति यथा निरुप्तममुष्मै त्वा जुष्टं प्रोक्षामीत्य
वहितांस्त्रि[illegible] फलीकृतान्नाना श्रपयेत्समोप्य वा यदि नाना श्रपयेद्वि राम
भज्य तंडुलानभिमृशेदिदममुष्मा इदममुष्मा इति यद्युवे समोप्य व्युद्धा ७
रं जुहुयात् घृतान्नि ह[illegible] वींष्यभिघार्योदगुद्वास्य बर्हिष्यासाद्य प्रत्यभिघा

र्येध्ममभिघार्याग्नौ तं इध्मं अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्ध
य चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहेति तूष्णीमा
घारावाघार्याज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहेत्युत्तरमा
ग्नेयं दक्षिणं सौम्यं विज्ञायते चक्षुषी वा एते यज्ञस्य यदाज्यभागौ
तस्मात्पुरुषस्य प्रत्यङ्मुखस्यासीनस्य दक्षिणमक्ष्युत्तरं भवत्युत्तरं
दक्षिणं मध्ये हवींषि प्रत्यक्करवा प्राक्संस्थान्युदक्संस्थानि वोत्तरपुर
स्तात्तौ विष्टकृतं मध्यात्सुवान्हविषो हविषावद्यति मध्यात्पूर्वार्धात्पश्चा
र्धादिति पंचावत्तिनामुत्तरार्धात्सौविष्टकृतं नावदर्वीष्यभिप्रत्यभिघारयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ॰ सू॰
८

स्विष्टकृतं द्विरभिघारयति॥ यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरं॥
अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे॥ अग्नये स्विष्टकृते सु
हुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्सम
र्धय स्वाहेति बर्हिषि पूर्णपात्रं निनयेदेषो वष्टथः पाकयज्ञानामेतत्तंत्रं ह
विरुच्छिष्टं दक्षिणा॥ १०॥ अथ पशुकल्प उत्तरतोऽग्नेः शामित्रस्यायतनं
नं कृत्वा पाययित्वाप आप्लाव्य पुरस्तात्पशुमवस्थाप्याग्निं दूतमि
ति द्वाभ्यां हुत्वा सपलाशयार्द्रशाखया पश्चादुपस्पृशेदमुष्मै त्वा जुष्टमु
पाकरोमीति व्रीहियवमतीभिरद्भिः पुरस्तात्प्रोक्षत्यमुष्मै त्वा जुष्टं प्रोक्षा हेस्वू
मीति तासां पाययित्वा दक्षिणमनु बाहुं शेषं निनयेदावृतैव

२

पर्यग्निकृत्वोदंचं नयंति तस्य पुरस्तादुल्मुकं हरति शामित्र एष भवति वपाश्रप
णीभ्यां कर्तोपस्पृशमन्वारभते कर्तारं यजमानः पश्चाच्छामित्रस्य प्राक्शिरसं
प्रत्यक्शिरसं वोदक्पादं संज्ञप्य पुरा नाभेस्तृणमंतर्धाय वपामुत्खिद्य वपाम
वदाय वपाश्रपणीभ्यां परिगृह्याद्भिरभिषिच्य शामित्रे प्रताप्याग्रेणाग्निं हृत्वा
दक्षिणत आसीनः श्रपयित्वा परीत्य जुहुयादेतस्मिन्नेवाग्नौ स्थालीपाकं श्र
पयंत्येकादशावदानानि सर्वांगेभ्योऽवदाय शामित्रे श्रपयित्वा हृदयं शूले प्र
ताप्य स्थालीपाकस्याग्नौ जुहुयादवदानैर्वा सहैकैकस्यावदानस्य द्विर्द्विरव
दाय वत्ते वदस्य शूलेन चरंति॥ ११॥ चैत्ययज्ञे प्राक्स्विष्टकृतश्चैत्याय बलिं ह
रेत्पुर्णैर्विदेशस्थं पलाशदूतेन यत्र वेत्थ वनस्पत इत्येतया चौद्धौ पिंडौ कृत्वा
द्विवधाभ्यां आयुधाय भयउद्दिमं तस्मै बलिं हरेदिति चैनं ब्रूयाद्यं तु भ्यमिति यो
दूताय प्रति भयं चेदंतरा शस्त्रमपि किंचिन्नाव्याद्वेन्न यंतरा प्लवरूपमपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ सू॰ किंचिद्दत्तेन तरितव्यमिति धन्वंतरियज्ञे ब्रह्माणमग्निं चांतरा पुरोहितायाग्नये
१ बलिं हरेत् ॥ १२ ॥ उपनिषदि गर्भलंभनं पुंसवनमनवलोभनं च यदि नाधी
यात्तृतीये गर्भमासे तिष्येणोपोषितायाः सरूपवत्साया गोर्दधनि द्वौ
द्वौ तु माषौ यवं च दधिप्रसृतेन प्राशयेत् किं पिबसि किं पिबसीति पृष्टा
पुंसवनं पुंसवनमिति त्रिः प्रतिजानीयादेवं त्रीन्प्रसृतानथास्यै मंडलागा
रच्छायायां दक्षिणस्यां नासिकायामजीतामोषधीं नस्तः
करोति प्रजावज्जीवपुत्राभ्यां हैके आ ते गर्भो योनिमेतु पुमान्बाण
इवेषुधिं । आ वीरो जायतां पुत्रस्ते दशमास्यः । अग्निरैतु प्रथ
मो देवतानां सोऽस्यै प्रजां मुंचतु मृत्युपाशात् । तदयं राजा वरु राम
णोनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदादिति प्राजापत्य ४

स्य स्थालीपाकस्य हुत्वा हृदयदेशमस्या आलभेत यत्ते सुशीमे हृ
दये हितमंतः प्रजापतौ ॥ मन्येहं मां तद्विद्वांसं माहं पौत्रमघं नि
यामिति ॥ १३ ॥ चतुर्थे गर्भमासे सीमंतोन्नयनमापूर्यमाणपक्षे
यदा पुंसा नक्षत्रेण चंद्रमा युक्तः स्यादथाग्निमुपसमाधाय पश्चा
दस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां
समन्वारब्धायां धाता ददातु दाशुष इति द्वाभ्यां राकामहं
मिति द्वाभ्यां नेजमेष प्रजापते न त्वदेतान्यन्य इति चाज्या
स्येयुग्मेन शलालुग्लप्सेन त्र्येण्या च शलल्या त्रिभिश्च
कुशपिंजूलैरूर्ध्वं सीमंतं व्यूहति भूर्भुवः स्वरोमिति त्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ॰सू॰ श्चतुर्वो वीणागाथिनौ संशास्ति सोमं राजानं संगायेता अ॰ १
१० मिति सोमो नो राजावतु मानुषीः प्रजा निविष्टचक्रासावि
ति यां नदीमुपवसिता भवंति ब्राह्मण्यश्च वृद्धा जीवपत्यो
जीवप्रजा यद्यदुपदिशेयुस्तत्तत्कुर्युरृषभो दक्षिणा ॥ १४ ॥ कु
मारं जातं पुरान्यैरालंभात्सर्पिर्मधुनी हिरण्यनिकाषं हिरण्य
निकाषं हिरण्येन प्राशयेत्प्रते ददामि मधुनो घृतस्य वेदं स
वित्रा प्रसूतं मघोनां ॥ आयुष्मान्गुप्तो देवताभिः शतं जीव शर
दो लोके अस्मिन्निति कर्णयोरुपनिधाय मेधाजननं जपति
मेधां ते देवः सविता मेधां देवी सरस्वती ॥ मेधां ते अश्विनौ दे १०
वावाधत्तां पुष्करस्रजाविति अंसावभिमृशत्यश्मा भव परशु

र्भव हिरण्यमस्तृतं भव ॥ वेदो वै पुत्रनामासि स जीव शरदः श
तमितींद्र श्रेष्ठानि द्रविणानि धेह्यस्मे प्रयंधि मघवन्नृजीषिन्निति च
नाम चास्मै दद्युर्घोषवदाद्यंतरंश्चतुरक्षरं वा द्व्यक्षरं प्रतिष्ठाकामश्चतु
रक्षरं ब्रह्मवर्चसकामो युग्मानि त्वेव पुंसामयुजानि स्त्रीणामभिवाद
नीयं च समीक्षेत तन्मातापितरौ विद्यातामोपनयनात्प्रवासादे
त्य पुत्रस्य शिरः परिगृह्य जपत्यंगादंगात्संभवसि हृदयादधिजा
यसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमिति मूर्धनि त्रिर
वघ्रायाद्दूरतेव कुमार्यै ॥ १५ ॥ षष्ठे मास्यन्नप्राशनमाजमन्ना
द्यकामस्तैत्तिरं ब्रह्मवर्चसकामो घृतौदनं तेजस्कामो दध्यो
दनमिंद्रियकामः क्षीरोदनं पशुकामो दधिमधुघृतमिश्रमन्नं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू॰ प्राशयेदन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः॥प्रप्रदातारंतारिषउ
११ र्जंनोधेहिद्विपदेचतुष्पदइत्यावृतैवकुमार्यै॥१६॥तृतीयेवर्षेचौलं
यथाकुलधर्मंवोत्तरतोग्नेर्व्रीहियवमाषतिलानांपृथक्पूर्णशरावा
णिनिधोदतिपश्चात्कारयिष्यमाणोमातुरुपस्थआनडुहंगोमयं
नवेशरावेशमीपर्णानिचोपनिहितानिभवंतिमातुःपितादक्षिणत
एकविंशतिकुशपिंजूलान्यादायश्चाविताणिधारयेपश्चात्कारयि
ष्यमाणस्यावस्थायशीतोष्णा अपः समानीयोष्णेनवायउदकेनेहि
तिनासाग्रहीत्वानवनीतंदधिद्रप्सवान्वाप्रदक्षिणंशिरास्त्रिरुदत्यदि
तिःकेशान्वपत्वापउंदतुवर्चसइतिदक्षिणेकेशपक्षेत्रीणित्रीणि
कुशपिंजुलान्यभ्यात्माग्राणिनिदधात्योषधेत्रायस्वेनंस्वधिते

मैनंहिंसीरितिनिःष्पीड्यलोहितनप्रच्छिंनत्तियेनावपत्सविताक्षुरेणसोम
स्यराज्ञोवरुणस्यविद्वान्॥तेनब्रह्माणोवपतेदमस्यायुष्मांजरदष्टिर्य
थासदितिप्रच्छिद्यप्राच्छिद्यप्रागग्राशमीपर्णैःसहमात्रेप्रयच्छतितानान
डुहेगोमयेनिदधातियेनधाताबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्॥
तेनतआयुषेवपामिसुश्लोक्यायस्वस्तयइतिद्वितीयंयेनभूयश्चरा
त्र्यांज्योक्चपश्यातिसूर्यं॥तेनतआयुषेवपामिसुश्लोक्यायस्वस्तय
इतितृतीयंसर्वैर्मंत्रैश्चतुर्थमेवमुत्तरतस्त्रिःक्षुरतेजो॥नमउदोयक्षु
रेणमर्क्षयसु॥तांपेशसावद्यावपस्यकेशानछिंधिशिरोमास्यायुः
प्रमोषीरितिनापितंशिष्याच्छितोष्णाभिरद्भिरर्थंकुर्वाणोक्षण्वन्कुश
लीकुर्वितियथाकुलधर्मंकेशवेशान्कारयेदावृतैवकुमार्यै॥१७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰सू॰ एतेनगोदानं षोडशेवर्षेकेशान्तादितुश्मश्रुणांदा कारयेच्छ्मश्रूणीहौंदतिशुं
१२ धिशिरोमुखंमास्यायुःप्रमोषीरितिकेशश्मश्रु लोमनखान्युदक्संस्था
निकुर्वीतिसंप्रेष्यत्याप्लुत्यवाग्यतःस्थित्वाहर्शेषमाचार्यसकाशेवाचं
विसृजेत्वरंददामीतिगोमिथुनंदक्षिणासंवत्सरमादिशेत्॥१०॥
अष्टमेवर्षेब्राह्मणमुपनयेद्गर्भाष्टमेवैकादशेक्षत्रियंद्वादशेवैश्यमा
षोडशाद्ब्राह्मणस्यानतीतःकालआद्वाविंशात्क्षत्रियस्याचतुर्विंशा
द्वैश्यस्यातऊर्ध्वंपतितसावित्रीकाभवंतिनैनानुपनयेन्नाध्यापये
न्नयाजयेन्नैभिर्व्यवहरेयुरलंकृतंकुमारंकृतशिरसमह हेरंबु
तेनवाससासंवीतमैणेयेनाजिनेनब्राह्मणंरौरवेणक्षत्रियमा १२
जेनवैश्यंयदिवाससावसीरन्रक्तानिवसीरन्काषायंब्रा

ह्मणोमांजिष्ठंक्षत्रियोहारिद्रंवैश्यस्तेषांमेखलामौंजीब्राह्मणस्यधनुर्ज्या
क्षत्रियस्यावीवैश्यस्यतेषांदंडाःपालाशोब्राह्मणस्योदुंबरःक्षात्र
यस्यबैल्वोवैश्यस्यकेशसंमितोब्राह्मणस्यललाटसंमितःक्षात्र
यस्यप्राणसंमितोवैश्यस्य॥११॥सर्वेवासर्वेषांसमन्वारब्धेहुत्वोत्तरतो
ग्नेःप्राङ्मुखआचार्योवतिष्ठतेपुरस्तात्प्रत्यङ्मुखइतरोपामंजली
पूरयित्वातत्सवितुर्वृणीमहइतिपूर्णेनास्य पूर्णमवक्षारयेत्या
स्मिन्देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांह
स्तंगृह्णाम्यसावितितस्यपाणिनापाणिंसांगुष्ठंगृह्णीयात्सवि
तातेहस्तमग्रभीदसावितिद्वितीयमग्निराचार्यस्तवासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृसू० वितितृतीयमादित्यमीक्षयेद्देवसवितरेषते ब्रह्मचारी।तंगोपायस अ०१
मामृतेत्याचार्यःकस्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसिकस्त्वाक
१३ मुपनयतेकायत्वापरिददामीति युवासुवासाःपरिवीतआ
गादित्यर्धर्चेनैनंप्रदक्षिणमावर्तयेत्तस्याध्यंसौपाणीहत्वाहृदयदेश
मालभेतोत्तरेणाग्निंपरिसमुह्यब्रह्मचारी।तूष्णींसमिधमादध्यात्
तूष्णींवैप्राजापत्यंप्राजापत्योब्रह्मचारीभवतीतिविज्ञायते॥२०॥
मंत्रेणहैकेअग्नयेसमिधमाहार्षंबृहतेजातवेदसे॥तयात्वमग्नेवर्ध
स्वसमिधाब्रह्मणावयंस्वाहेतिसमिधमाधायाग्निमुपस्पृश्यमु स
खंनिमार्ष्टि।तेजसामासमनज्मीतितेजसाह्येवात्मानंसम १३
नक्तीतिविज्ञायते।मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातु॥

मयिमेधांमयिप्रजांमयीन्द्रइन्द्रियंदधातु॥मयिमेधांमयिप्रजां
मयिसूर्योभ्राजोदधातु॥यत्तेअग्नेतेजस्तेनाहंतेजस्वीभूयासं॥य
त्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासं।यत्तेअग्नेहरस्तेनाहंहरस्वीभू
यासमित्युपस्थायजान्वाच्योपसंगृह्यब्रूयादधीहिभोःसावित्रींभो
अनुब्रूहीतितस्मैवाससापाणिभ्यांचपाणीसंगृह्यसावित्रीमन्वाहप
च्छोऽर्धर्चशःसर्वांयथाशक्तिवाचयीतहृदयदेशेऽस्योर्ध्वांगुलिपाणिमुप
दधाति॥ममव्रतेहृदयंतेदधामिममचित्तमनुचित्तंतेअस्तु।ममवा
चमेकव्रतोजुषस्वबृहस्पतिष्ट्वानियुनक्तुमह्यमिति॥इयंदुरुक्तात्प
रिबाधमाना।शर्मवरूथंपुनतीनआगात्।प्राणापानाभ्यांबल
माभरन्तीप्रियादेवानांसुभगामेखलेयं॥ऋतस्यगोप्त्रीतपस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्र॰सू॰ स्वसरसी घ्नती रक्षः सहमाना अरातीः ।। सानः समंतमनुपरिहि भद्र
१५ याभर्तारस्ते मेखले मारिषाम ।। २१ ।। मेखलामाबध्य दंडं प्रदाय
ब्रह्मचर्यमादिशेद् ब्रह्मचार्यस्यपोऽशान कर्म कुरु दिवा मा स्वाप्सीः आ
चार्याधीनो वेदमधीष्वेति द्वादशवर्षाणि वेदब्रह्मचर्यं ग्रहाणांतं वा
सायंप्रातर्भिक्षेत सायंप्रातः समिधमादध्यादप्रत्याख्यायिनमग्रे भि यि
क्षेताप्रत्याख्यायिनं भवान् भिक्षां ददात्वित्यनुप्रवचनीयमिति
वा तदाचार्याय वेदयीत तिष्ठेदहः शेषमस्तमितेब्रह्मौदनमनुप्र
वचनीयं श्रपयित्वाचार्याय वेदयीताचार्यः समन्वारब्धे हुतौ या
सदसस्पतिमद्भुतमिति सावित्र्या द्वितीयं यद्य किंचात ऊर्ध्वं पार॰ १५
मनूक्तस्यादर्षिभिस्तृतीयं सोविष्टकृतं चतुर्थं ब्राह्मणान्भोज

यित्वा वेदसमाप्तिं वाचयीत तत ऊर्ध्वमक्षारालवणाशी ब्रह्मचार्यधः शा
यी त्रिरात्रं द्वादशरात्रं संवत्सरं वा चरितव्रतायमेधाजननं करोत्यनिंदिता
यां दिशि यक्षमूलपालाशं कुशास्तंब वा पलाशापचारे दक्षिणमुदकुंभे
च त्रिः परिषिंचेत् तं वाचयति सुश्रवः सुश्रवा असि यथा त्वं मां सुश्रवः सौश्र
वसं कुरु ।। यथा त्वं देवानां यज्ञस्य निधिपोस्येवमहं मनुष्याणां वे
दस्य निधिपो भूयासमित्येतेन वापनादि दानांतं व्रतादेशनं व्या
ख्यातमित्यनुपेतपूर्वस्याथोपेतपूर्वस्य कृताकृतं केशवपनं मे
धाजननं चानिरुक्तं परिदानं कालश्च तत्सवितुर्वृणीमह इति सा
वित्री ।। २२ ।। त्रसत्तिजोऽवरणी तेन्युनानतिरिरक्तं मान्येमा त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०सू०त:पितत: श्रोत्रियथोक्तं पुरस्ताद्यून सत्विजो वृणीत इत्येके ॥
१९ ब्रह्माणमेव प्रथमं वृणीतेथ होतारमथाध्वर्युमथोद्गातारं सर्वा
न्वा यहीनेकाहे याजयंति सदस्यं सप्तदशं कौषितकिनः समामनं
ति स कर्मणामुपद्रष्टा भवतीति तदुक्तं कर्मभ्यायमृत्विजो बहुधा कल्प गृ
यंत इति होतारमेव प्रथमं वृणीतेग्निर्मे होतास ते होता होता
रं त्वामुवृण इति होतारं चंद्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्माणं त्वामुवृण
इति ब्रह्माणमादित्यो मे ध्वर्युरध्वर्युस्तं युपर्जन्यो म उद्गाता उद्गातारम्
रमसो मे होत्राशंसिन्यः शंसिन्य इति होत्रकानप्रमयो मे चमसा १९
ध्वर्यव इति चमसाध्वर्यून् आकाशो मे सदस्य इति सदस्यं स्व

नो जपेमहन्मे वोचो भर्गो मे वोचो भर्गो मे वोचो यशो मे वाचः स्तोमं मे वाचः
कॢप्तिं मे वोचो भुक्तिं मे वाच स्तृप्तिं मे वोचः सर्वं मे वोच इति त्वपि त्वाग्निष्टहो
सं तेहो ता होता हं ते मानुष इति होता प्रतीजानीते चंद्रमास्ते ब्रह्मा स त्वं ब्र
ह्मा ब्रह्म व गमितरे यथादेशं तन्मामवतु तन्मा विशतु तन्मा जिन्वतु तेन
भक्षीवीयेति च याचयिष्यन्य स्तमार्त्विज्यमकार्यं महीनस्यनीच्वद
क्षीणस्य व्याधितस्यातुरस्य यक्ष्मगृहीतस्यानुद्देश्य भिशस्तस्याक्षि
मयोनेरिति चैतेषां सोमप्रवाकं परिपृच्छेत को यज्ञः क ऋत्विजः का
दक्षिणेति कल्याणैः सह संप्रयोगो न मांसमश्नीयुर्न स्त्रियमुपेयु
रा क्रतोरपवर्गादेतेनाग्नेब्रह्मणा वा वृध स्वीति दक्षिणाग्ना वाज्या
हुतिं जुहोति यथार्थं प्रव्रजेदेवमेनाहिताग्निर्गृह्य इमा मग्नेशरणिं मीम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰स्॰ षोनङ्क्षेतयचो ॥ २३ ॥ सविंतोव्रत्वामधुपर्कमाहरेत्स्नातका
१६ योपस्थितेभ्यः तौ राज्ञे चाचार्यश्वशुरपितृव्यमातुलानां च वृद्धानि
मध्वानीयसर्पिर्वामधु अलाभे विष्टरः पाद्यमर्घ्यमाचमनीयं मधु
पर्को गौरित्येतेषां त्रिस्त्रिः एकैकं वेदयंते हं वर्ष्मः सजातानां विद्यु
तामिव सूर्यः ॥ इदं तमधितिष्ठामि यो मा कश्चाभिदासतीत्युदगग्रेण वि
ष्टर उपविशेदुदाक्रम्य वा पादौ प्रक्षालयीत दक्षिणमग्रे [illegible]
ब्राह्मणाय प्रयच्छेत्सव्यं शूद्राय प्रक्षालितपादोऽर्घ्यमंजलिना प्र
तिगृह्याथाचमनीयेनाचामेत् अमृतोपस्तरणमसीति मधुपर्क
माह्रियमाणमीक्षते मित्रस्य त्वा चक्षुषा प्रतीक्ष इति देवस्य त्वा सवि
तुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति

तदंजलिना प्रतिगृह्य सव्ये पाणौ कृत्वा मधुवाता ऋतायत इति त्र्य
चेनावेक्ष्यानामिकयांगुष्ठेन च त्रिः प्रदक्षिणं मालोड्य वसवस्त्वा
गायत्रेण छंदसा भक्षयंत्विति पुरस्तान्निमार्ष्टि रुद्रास्त्वा त्रैष्टुभेन छंद
सा भक्षयंत्विति दक्षिणत आदित्यास्त्वा जागतेन छंदसा भक्ष
यंत्विति पश्चाद्विश्वे त्वा देवा आनुष्टुभेन छंदसा भक्षयंत्वित्युत्तरतो
भूतेभ्यस्त्वेति मध्यात्त्रिरुद्गृह्य विराजो दोहोसीति प्रथमं प्राश्नीया
द्विराजो दोहमशीयेति द्वितीयं मयि दोहः पद्यायै विराज इति
तृतीयं न सर्वं न तृप्तिं गच्छेद्ब्राह्मणायोदङ् उच्छिष्टं प्रयच्छेदलाभेऽप्सु
सर्वं वाथाचमनीयेनाचामत्यमृतापिधानमसीति सत्यं यशः
श्रीर्मयि श्रीः श्रयतामिति द्वितीयमाचांतोदकाय गां वेदयते हतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गस्मू॰मे पाप्मा पाप्मा मे हत इति जपित्वों कुरुतेति कारयिष्यं माता रु
३७ द्रणांदुहितावसूनामिति जपित्वोमुत्सृजतेत्युत्स्रक्ष्यंनामांसो
मधुपर्कोभवतिभवति ॥ २४ ॥ इत्याश्वलायनसूत्रेप्रथमोध्यायः ॥
॥ हरिः ॐ म् ॥ श्रावण्यांपोर्णमास्यांश्रवणाकमोक्षतसक्तूनांनवे
कलशंपूर्यिचादर्वींबलिहरणीनवेशिक्येनिदधात्यक्षतधानाःकृ
सपिषार्धा अनक्त्यस्यमिलेस्थालीपाकंश्रपयित्वैककपालंचपुरो
डाशमग्नेनयसुपथारायेअस्मानितिचतसृभिःप्रत्यृचंहुत्वापा
णिनैककपालंमच्युतायभौमायस्वाहेत्याविपृचस्यादाविः राम
पृष्ठोवामानोअग्नेवसुजोअप्यायेस्येनमाशायेनाभिजुहो १०
तिशंनोभवंतुवाजिनोहवेष्वित्यक्तांधामाअंजलीनामायं

भ्यद्भुतरादंद्यात्कलशात्सक्तूनादर्व्यांपूर्वयित्वाग्नागुपनिष्क्रम्यशुचौ
देशेपोवनिनीयसर्पदेवजनेभ्यःस्वाहेतिहुत्वानमस्करोति येसर्पाःपा
र्थिवायआन्तरिक्ष्यायेदिव्यायेदिश्यास्तेभ्यइमंबलिमाहार्षंतेभ्य
इमंबलिमुपाकरोमीतिप्रदक्षिणंपरीत्यपश्चाद्बलेरुपविश्यसर्पोसि
सर्पतांसर्पाणामधिपतिरस्यन्नेनमनुष्यांस्त्रायसेपूपेनसर्पान्यन्येन
देवांस्त्वेयिमासंतंत्वेसन्तःसर्पामाहिंसिषुर्ध्रुवंतेपरिददामीतिध्रुवा
मुंनेध्रुवामुंतइत्यमात्याननुपूर्वंध्रुवमांतेपरिददामीत्यात्मानं
मंततोनैनमंतराव्यवेयुरापरिदानात्सर्पदेवजनेभ्यःस्वाहेतिसायं
प्रातर्बलिंहरेदाप्रत्यवरोहणात्संख्यायदेकेतावतोबलीस्तद
रेवापहरंति ॥ १ ॥ आश्वयुज्यामाश्वयुजीकर्मग्निवेश्मानमलंकृते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग०सू० हुत्य स्नाताः शुचिवाससः पशुपतये स्थालीपाकं निरुप्य जुहुयुः पशु अ०२
३९ पतये शिवाय शंकराय पृषातकाय स्वाहेति पृषातकमंजलिना जुहुयादू
नमे पूर्यतां पूर्णं मे मोपसदत्पृषातकाय स्वाहेति सजूर्ऋतुभिः सजूर्विधा
भिः सजूरिन्द्राग्निभ्यां स्वाहा॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वे
भ्यो देवेभ्यः स्वाहा॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्द्यावापृ
थिवीभ्यां स्वाहेत्याहिताग्नेराग्रयणः स्थालीपाकोनाहिताग्ने
रपि शालाग्नौ॥ २॥ मार्गशीर्ष्यां प्रत्यवरोहणं चतुर्दश्यां पौर्णमा
स्यां वा निवेशनं पुनर्नवी कुर्वीत लेपनास्तरणोपस्तरणोपस्तरणैरस्तमिते
पायसस्य जुहुयुः पश्चेत्पदाज्जहि पूर्वेण चापरेण च॥ सत्त्वं वारुणी रि हेरंबु
माः सर्वाश्चराजन्बांधवी स्वाहा॥ नवेश्मेत श्राभ्यागारे हिजं धानाकि
चन॥ श्वेताय वैदार्वायन नमः स्वाहेति नात्र सौविष्टकृदंभयं नः प्राज्ञा ३९

प्राज्ञेभ्यो भूयादित्यग्निमीक्षमाणो जपति शिवो नः सुमना भवेति हेमं
तं मनसा ध्यात्वा पश्चादग्नेः स्वस्तरः स्वास्तीर्णः तस्मिन्नुपविश्य स्योना
पृथिवी भवेति जपित्वा संविशत्यामात्याः प्राक्शिरा उदङ्मुखो वाय
थावकाशामितरे ज्याया ज्यायांस्त्वानंतरा मंत्र विदो मंत्रान् जपेयुः सवा
यातोदेना अवंतु न इति त्रिरेतां दक्षिणामुखाः प्रत्यङ्मुखा उदङ्मु
खाश्चतुर्थं संहाय सौर्याणि स्वस्त्ययनानि च जपित्वा नं संस्कृ
त्य ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयीत॥ ३॥ हेमंतशिशि
रयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वा पूर्वेद्युः पित
भ्योदद्यादोदनं कृशरं पायसं चतुः शरावस्य वापूपानुद्दीरतानम
वरुसरासइत्यष्टाभिहुत्वा यावत्तीभिर्वा काम वयीताथ स्वो
भूतेष्टकाः पशुनास्थालीपाकेन चाप्य नजुहोय वसमाहरे

गृ॰सू॰ दग्निनावाकक्षमुपोषेदेषामेष्टकेतिनत्वेवानष्टकस्यात्तांहैकेवै अ०२
१९ श्वदेवींब्रुवतआग्नेयीमेकेसौर्यामेकेप्राजापत्यामेकेरात्रिदेव
तामेकेनक्षत्रदेवतामेकऋतुदेवतामेकेपितृदेवतामेकेपशु
देवतामेकेपशुकल्पेपशुंसंज्ञप्यप्रोक्षणोपाकरणवर्जंवपा
मुत्खिद्यजुहुयाद्वहवपांजातवेदःपितृभ्योयत्रैनान्वे
त्थनिहितान्पराकेमेदसःकुल्याउपैनांस्रवन्तुसत्याएता
आशिषःसंतुसर्वाःस्वाहेत्यथावदानानांस्थालीपाकस्यचा
ऽन्नेनयःसुरायेअस्मानितिद्वेग्रीष्मोहेमंतऋतवःशिवानो
वर्षाःशिवाअभयाशरन्नः॥संवत्सरोधिपतिःप्राणदोनो
होरात्रेकृणुतांदीर्घमायुःस्वाहा॥शांतापृथिवीशिवमंतरि

क्षंद्योनोदेव्यभयंनोअस्तु॥शिवादिशःप्रदिशउद्दिशोनआपो
विद्युतःपरिपांतुसर्वतःपरिपांतुसर्वतःस्वाहा॥आपोमरीचीः
प्रवहंतुनोधियोधातासमुद्रोवहंतुपापं॥भूतंभविष्यदभयं
विश्वमस्मेब्रह्माधिगुप्तःस्वराक्षराणिस्वाहा॥विश्वआदित्या
वसवश्चदेवारुद्रागोप्तारोमरुतःसदंतु॥ऊर्जंप्रजाममृतंपिन्व
मानःप्रजापतिर्मयिपरमेष्ठीदधातुस्वाहा॥प्रजापतेनत्वदे
तान्यन्यःसोविष्टकृत्यष्टमीब्राह्मणान्भोजयेदित्युक्तं॥४॥
अपरेद्युरन्वष्टक्यंतस्यैवमासस्यमकल्प्यदक्षिणाप्रवणेऽ
ग्निमुपसमाधायपरिश्रित्यपरिश्रितस्यद्वारंकृत्वासमूलंब
र्हिस्त्रिरप्रसलैरविधून्वन्नपरिस्तीर्यहवींष्यासादयेदोदनंकृसरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰सू॰ पायसं दधिमंथान्मधुमंथांश्च पिंडपितृयज्ञकल्पेन हुत्वा मधुमंथ
२० वर्जं पितृभ्यो दद्यात्स्त्रीभ्यश्च सुरां चाचाममित्यधिकं कर्षूषु केद
योषित्सु वा पूर्वासु पितृभ्यो दद्यादपरासु स्त्रीभ्य एतेन माघ्याव
र्षं प्रोष्ठपद्या अपरपक्षे मासि मासि चैव पितृभ्यो युक्षु प्रतिष्ठाप
येन्नवावरान्भोजयेदयुजो वा युग्मांश्च वृद्धिपूर्तेषु युग्मानितरेषु
प्रदक्षिणमुपचारो यवैस्तिलार्थः ॥ ५ ॥ रथमारोक्ष्यन्नानापा
णिभ्यां चक्रे अभिमृशेदहं ते पूर्वपादावारभे बृहद्रथंतरे ते चक्रे
वामदेव्यमक्ष इत्यथ क्षाधिष्ठानेदक्षिणपूर्वाभ्यामारोहेदायोष्ट्या हेरंब
वीर्येणारोहामी इन्द्रस्यौजसाधिपत्येनेति रश्मीन्संमृश्योदरश्मिका
ण्डेन ब्रह्मणा वस्त्वासां गृह्णामीति सत्येन वः संगृह्णामीत्यभि २०
प्रवर्तमानेषु जपेत्सहस्रसनिं वाजमभिवर्तस्व रथ देवप्रवह

वनस्पते वीड्वंगो हि भूया इत्येतयान्यविवानस्पत्यानि स्थिरो गवो भव
तां वीडू रक्ष इति रथांगमभिमृशेत्सुत्रामाणं पृथिवीं द्यामनेहसमि
ति नावं नवरथेनयशस्विनं रक्षंद देवा विदासीनं प्रदक्षिणं कृत्वा फल
वतो वारक्षा आहरेदन्यत्वा कौटुंबं सुसदमुपयायादस्माकमुत्तमं कृधी
त्यादित्यमीक्षमाणो ऽजपित्वावरोहेदृषभं मासमानामित्यभिक्राम
न्यमदं इन्द्रस्य प्रेष्ठा इत्यस्तयात्यादितद्दो दिवो दुहितर्विभातीरिति व्यु
ष्टायां गाथाः ॥ अथातो वास्तुपरीक्षा नखरमाविवर्णदिष्टभूमोषधिवन
स्पतिवद्यस्मिंकुशवीरिणं प्रभूतं कण्टकिक्षीरिणः ॥ स्कसमूलान
रवादयो ह्रासयेदपामार्गः शाकास्तिलकः परिव्याध इति चैतानि
यत्र सर्वत आपो मध्ये समेत्य प्रदक्षिणं शायनीय परीत्य प्राच्यः स्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ॰सू॰ देरन्तप्रवदत्यस्तत्सर्वे समन्यक्ष्यं समस्त्रवेभक्तशरणं कारयेद्धुक्तं
२१ हभवति युदक्षिणाप्रवणे सभां मापयेत्साद्यूताहभवति
युवान स्त्स्यां कितवाः कलहिनः प्रमायुकाभवंतीय
त्रसर्वत आपप्रस्यदे रन्त्साखस्यय न्यद्यूताच्च॥ ७॥
अथैतै वास्तुपरीक्षेत जानुमात्रं तं खात्वा तेनैव पांसु
भिः प्रतिपूरयेद धिकम् शस्तं समेवातं न्यूने गर्हितं मस्तमि
ते पांपूर्णपरिवास्य यत्सोद्केमन्नामाद्र्वावातं शुष्के गर्हितं २१
श्वेतं मधुरास्वादं सिकता चरं ब्राह्मणस्य लोहितं क्षत्रि
यस्य पीतं वैश्यस्य तत्सरस्सीतरुखा यथादिक्समव

तुरस्रं मापयेद आयत चतुरस्रं वा तच्छमीशाखयोदुंबरशाखया
वाशानालीयन्त्रि। प्रदक्षिणं प्रोक्षस्य विच्छिन्नया चोदकधारया पो
हिषा मयोभुव इति तृचेन नवं गांतरेषु शरणाकारयेगर्तेषु नकांशी
पालमित्यवधाप्येन्न हास्यदरात्कोभवतीति विज्ञायते मध्यम
स्थूणायां गर्ते विधाय प्रागग्रोदगग्रां कुशानास्तीर्य व्रीही यव
मती रप्त आसेचयेद च्युताय भौमाय स्वाहेत्यथैनामुछ्रीयमाणा
मनुमंत्रयेते हैव तिष्ठ निमिता तिल्वि लास्त्वामिरावती मध्ये पोष
स्व तिष्ठती॥ आत्वा प्रापन्नघायव आत्वा कुमारस्तरुण आवत्सो जा
यतां सह॥ आत्वा परिश्रितः कुंभ आदध्नः कलशैरयंनिति ←

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ०सू०२ वंशमाधीयमानामृतेन स्थूणमधिरोह वंश उग्र आपीय आयुष्प्रतरं द
२२ धानादिति सद्वीसु चतसृषु शिला सुमणिकं प्रतिष्ठापयेत्स्थि
ष्ठा अधि संभवेत्यरगरो वावदीति त्रेधाबद्धो वरत्रया ॥ इरामुदप्र
त्रांसत्यनिरामपबाधतामितिवाथास्मिन्नप आसेचयेदैतु राजा व
रुणो रेवतीभिरस्मिन्स्थाने तिष्ठतु मोदमानः इरां वहतो घृतमुक्षमा
णा मित्रेण साकं सह स विशेत्यथैनं छं मयतिव्रीहियवमती ≡
भिरद्भिर्हिरण्यमवधाय शान्तातीयेन त्रिप्रदक्षिणं परिव्रजन्नाक्ष
त्य विच्छिन्नया चोदकधारयापो हिष्ठामयोभुव इति त्वैनम ≡ राम
ध्ये गारस्य स्थालीपाकं श्रपयित्वा वास्तोष्पते प्रतिजानीह्यस्मा २२
निति चतसृभिः प्रत्यृचं हुत्वा न संस्कृतस्य ब्राह्मणा भोजयि

त्वा शिवं वास्तु शिवं वास्त्विति वाचयीत ॥ ९ ॥ उक्तं गृहप्रपदनं
बीजवतो गृहान्प्रपद्येत क्षेत्रं प्रकर्षयेदुत्तरैः प्रोष्ठपदैः फल्गुनीभी
रोहिण्या वा क्षेत्रस्यानुवातं क्षेत्रस्य पतिना वयमिति प्रत्यृचं ह
जुहुयाज्जपेद्वा गाः प्रतिष्ठमाना अनुमंत्रयेत मयोभूर्वातो अभि
वातूस्रा इति द्वाभ्यामायतीर्यासां मूधश्चतु बिलं मधोः पूर्णं घृ
तस्य च ॥ तानः संतु पयस्वतीर्बह्वीर्गोष्ठि घ चान्यः उपमैतु मयो
भुवऊर्जं चौज्वश्च बिभ्रतीः ॥ इहा ना अक्षितं पयो मयि गोष्ठेनि
विशध्वं यथा भवाभवां मृत्तमो या देवेषु तन्व मैरयंतेति च सूक्तशे
षमागावीयमे के गणानां सामुपतिष्ठेता गुरुगव्वीनां भुनास्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰सू॰ मत्रा स्तास्थनाभिनाः प्रियाः मियोवोभूयासं त्वां मयिजानीध्वं त्वां म अ॰ २
२३ यिजानीध्वं ॥ १० ॥ इत्याश्वलायनसूत्रे द्वितीध्यायः ॥ छ ॥
श्रीकृष्णार्पणमस्तु ॥ छ ॥ हरिः ॐ म ३ ॥ श्रिगुरुभ्यो नमः ॥ छ ॥
अथातः पंचयज्ञादेवयज्ञोभूतयज्ञः पितृयज्ञोब्रह्मयज्ञोमनु
ष्ययज्ञइति तद्यदग्नोजुहोति सदेवयज्ञो यद्बलिंकरोति स
भूतयज्ञो यत्पितृभ्यो ददाति सपितृयज्ञो यत्स्वाध्यायम
धीते सब्रह्मयज्ञो यन्मनुष्येभ्योददाति समनुष्ययज्ञइ राम॰
तितानेतान्यज्ञानहरहः कुर्वीत ॥ १ ॥ अथस्वाध्या २३
यविधिः प्रागुदग्वाग्नामान्निष्क्रम्या[illegible] आप्लुत्य शुचौदे

शेयज्ञोपवीत्याचम्याक्लिन्नवासा दर्भाणांमहदुपस्तीर्यप्राक्कूला
नांतेषुप्राङ्मुखउपविश्योपस्थंकृत्वादक्षिणोत्तरोपाणीसंधायपवि
त्रवंतौविज्ञायतेपांवाएषओषधीनांरसोयद्दर्भाःसरसमेवतद्ब्र
ह्मकरोतिद्यावापृथिव्योःसंधिमीक्षमाणःसंमील्यवायथा
वायुक्तमात्मानंमन्येततथायुक्तोधीयीतस्वाध्यायमोंपूर्वाव्या
हृतयःसावित्रीमन्वारब्धौऽर्धर्चशःसर्वामितितृतीयं ॥ २ ॥
अथस्वाध्यायमधीयीतऋचोयजूंषिसामान्यथर्वांगिरसोब्रा
ह्मणाकल्पान्गाथानाराशंसीरितिहासपुराणानीतियदृचोधी
तेपयआहुतीभिरेवतास्तर्पयतियद्यजूंषिघृताहुतिभिर्यत्सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्र॰सू॰ मानि मध्वाहुतिभिर्यदथर्वांगिरसः सोमाहुतिभिर्यद्ब्राह्मणानि क
२४ ल्पान्गाथानाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदृचो धीते
पयसः कुल्या अस्य पितॄन्स्वधा उपक्षरंति यद्यजूंषि घृतस्य कुल्या
यत्सामानि मध्वः कुल्या यदथर्वांगिरसः सोमस्य कुल्या यद्ब्राह्म
णानि कल्पान्गाथा नाराशंसीरितिहासपुराणानीत्यमृतस्य कुल्याः
स यावन्मन्येत तावदधीत्यैतया परिदधाति नमो ब्रह्मणे न
मो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ॥ नमो वाचे नमो हेरंब
वाचस्पतये नमो विष्णवे महते करोमीति ॥३॥ देवतास्तर २७
पयति प्रजापतिर्ब्रह्मा वेदा देवा ऋषयः सर्वा छंदांस्योंकारो व्या
हृतयः सावित्री यज्ञा द्यावापृथिवी अंतरिक्षमहोरात्राणि संख्याः

सिद्धाः समुद्रा नद्यो गिरयः क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसो नागा व
साध्या विप्रा यक्षा रक्षांसि भूतान्येवमंतान्यथ ऋषयः शतर्चिनो मा
ध्यमा गृत्समदो विश्वामित्रो वामदेवो ऽत्रिर्भरद्वाजो वसिष्ठः प्रग
थाः पावमान्यः क्षुद्रसूक्ता महासूक्ता इति प्राचीनावीती सुम
न्तुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचा
र्या जानंतिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूके
या गार्गी वाचक्नवी वडवा प्रातीथेयी सुलभा मैत्रेयी कहोलं कौषी
तकं महाकौषीतकं पैंग्यं महापैंग्यं सुयज्ञं सांख्यायनमैतरे
यं महैतरेयं शाकलं बाष्कलं सुजातवक्त्रमौदवाहिं महौदवाहिं
सौजामिं शौनकमाश्वलायनं ये चान्ये आचार्यास्ते सर्वे तृप्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ०सू० त्विति प्रतिपुरुषं पितॄंस्तर्पयित्वा गृहानेत्य यद्धाति सा दक्षिणा अ०२
२५ पिवि ज्ञायते स यदि तिष्ठन्नासीनः शयानो वा यं यं क्रतु
मधीते तेन तेनास्य क्रतुनेष्टं भवतीति विज्ञायते तस्यद्वाव
न ध्यायो यदात्माशुचिर्यद्देशः ॥ ४ ॥ अथातोऽध्यायोपाकरण
मोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पंचम्यां हस्तेन वाज्य
भागौ हुत्वाज्याहुती सावित्र्यै ब्रह्मणे श्रद्धायै मेधायै प्रज्ञायै धारणा जुहु
स यै सदसस्पतयेनुमतये छंदोभ्य ऋषिभ्यश्च स्थ दधिसक्तून्नु हेरंबू
होत्यग्निमीळे पुरोहितमित्येका कुसुंभ कस्त्वद्भूर्वीदाव॰ हि
दं स्केभ कुनभद्रमा वदग्गणानाजमदग्निना धामं ते विश्वं॥२९
भुवनमधिश्रितं गं तानोयाज्ञियसुशमीयोनयोनस्योअर

णप्रति चक्षु वि चक्ष्वाग्ने याहि मरुत्सखा यत्ते राजञ्छृतं हविरिति
ह्वचा समानीव आकूतिरित्येकैकात छंयोरावृणीमह इत्येका ध्येष्य
माणोऽध्याप्यैरन्वारब्ध एताभ्यो देवताभ्यो हुत्वा सौविष्टकृतं हुत्वा
दधिसक्तून्प्राश्य ततो मार्जनम परेणाग्निं प्राक्कूलेषु दर्भेषूपविश्यो
दप्रात्रे दर्भान्कृत्वा ब्रह्मांजलिकृतो जपेदोंपूर्वा व्याहृतयः तं सावित्रीं
चात्रिरभ्यस्य वेदादिमारभेत थोत्सर्गे षण्मासानधीयीत समामन्तो ब्रह्म
चारिकल्पेन यथान्यायमितरे आचार्योपेय इत्येके प्राजापत्यं तदाधिक
मित्येतदाचक्षते मध्यमाष्टकायामेताभ्यो देवताभ्योऽग्नौ हुत्वापोऽभ्यवे
तासु एवतद्देवतास्तर्पयंत्याचार्यान्रषीन्पितृंश्चैतदुत्सर्जनं ॥ ५ ॥ ॥
अथ काम्यानां स्थाने काम्याश्चरवस्तानेव कामानाप्नोत्यथ व्याधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ० सू० ३ धितस्यातुरस्य यक्ष्मगृहीतस्याज्याहुतिश्चरुर्मुंचामित्वा हविषा
२६ जीवनायकमित्येतेन स्वप्नमर्थं दृष्ट्वाद्यानोदेवसवितुरिति द्वाभ्यां यत्र
गोषु दुःष्वप्न्यमिति पंचभिरादित्यमुपतिष्ठेत यो मे राजन्युज्यो वा सखा वेति वा
क्षुताज्जभित्वा मनोज्ञं दृष्ट्वा पापकं गंधमाघ्रायाक्षिस्पंदने कर्णध्वनने च सुच
क्षोऽहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भयि दक्षक्रतू इति जपे
द्गमनीयां गत्वायाज्यं याजयित्वाभोज्यं भुक्त्वा प्रतिग्राह्यं प्रतिगृह्य चैत्यं यू
पं चोपहत्य पुनर्मामैत्विंद्रियं पुनरायुः पुनर्भगः। पुनर्द्रविणमैतु मां पुनर्ब्रा हेरंब
ह्मणमैतु मां स्वाहा। इमे ये धिष्ण्यासो अग्नयो यथास्थानमिह कल्पतां
वैश्वानरो वावृधानो अंतर्यच्छतु मे मनो हृद्यंतरमृतस्य केतुः स्वाहेत्याज्या २६
हुती जुहुयात् समिधो वा जपेद्वा॥ ६॥ अभ्याधितश्चेत्स्वपंतमादित्यो

भ्युदियादभ्यस्तमियाद्वाग्यतोऽनुपविश्य रात्रिशेषं भूत्वा येन सूर्य ज्योतिषा बा
धसे तम इति पंचभिरादित्यमुपतिष्ठेताभ्युदितश्चेद्यादकर्मश्रांत
मनभिरूपेण कर्मणा वाग्यत इति समानमुत्तराभिश्चतसृ
भिरुपस्थानं यज्ञोपवीती नित्योदकः संध्यामुपासीत वा
ग्यतः सायमुत्तरापराभिमुखोऽन्वष्टमदेशं सावित्रीं जपेद
ध४ धास्तमिते मंडलआनैत्रदर्शनाद्देवं प्रातः प्राङ्मुखस्तिष्ठन्ना
मंडलदर्शनात्कपोतश्चेदगारमुपहन्यादनु पतेद्वा देवाः
कपोत इति प्रत्यृचं जुहुयाज्जपेद्वा वयसु त्वा पथस्पदे इत्यर्थं त २
र्यांचरिष्यं संपूषन्विदुषेति नष्टमधिजिगमिषं मूढो वा संपू

गृ॰सू॰ ष्टं न ध्वनद्दूतिमहात्मध्वानमेष्य न्नाति भयं वा ॥७॥ अथैतान्युपकल्प
२७ यीत समावर्तमानो मणिं कुंडले वस्त्रयुग्मं छत्रमुपानद्युगं दंडं स्रजमु
न्मर्दनमनुलेपनमांजनमुष्णीषमित्यात्मने चाचार्याय च यद्युभयान्न
विंदेताचार्यायैव समिधं चाहरेदपराजितायां दिशि यज्ञियस्य भ
वृक्षस्यान्नाद्यकामः पुष्टिकामस्तेजस्कामो वा ब्रह्मवर्च
स कामउपवीतास्तु भयीमुभय कामउपरिसमिधं कृत्वागामन्न
च ब्राह्मणेभ्यः प्रदाय गोदानिकं कर्म कुर्वीतात्मनि मंत्रान्संन
मयेरं कुर्वीत केनश्री तोष्णाभिरद्भिः स्नात्वा युववस्त्राणि पीव राम
सावसाथे इत्यहते वाससी आच्छाद्यात्रमन स्तेजोसि चक्षु २७
र्मे पाहीति चक्षुषी आंजयीतात्रमनस्तेजोसि श्रोत्रं मे पाही
ति कुंडले आबध्नीतानुलेपनेन पाणि प्रलिप्य मुखमग्रे ब्राह्मणोनुलि
पेद्बाहु राजन्य उदरं वैश्य उपस्थं स्त्र्यूरू सरजीविनो नातोस्य नातोह
भूयासमिति स्रजमपि बध्नीत न मालेति चेद्बृहयुः स्रगित्य
पिधापयीत देवानां प्रतिष्ठेस्थः सर्वतो मा पातमित्युपानहावा
स्थायदिवश्छदनमसीति छत्रमादत्ते वेणुरासि वानस्पत्योसि स
र्वतो मा पाहीति वैणवं दंडमायुष्यमिति सूक्तेन मणिं कंठे प्रतिमु
च्योष्णीषं कृत्वा तिष्ठं समिधमादध्यात् ॥ ८ ॥ स्नातं निंद्या चाविद्या
चुश्रूषा प्रज्ञा च पंचमी ॥ इष्टं दत्तमधीतं च कृतं सत्यं श्रुतं व्रतं ॥ यद
ग्नेसेंद्रस्य सप्रजापतिकस्य सऋषिकस्य सऋषि राजन्यस्य सपि
तृकस्य सपितृ राजन्यस्य समनुष्यस्य समनुष्य राजन्यस्य साका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृ·सू० ऋशास्यसा। तीकाण्डस्य सानूकाण्डस्यस प्रतीकाण्डस्यस देवमनु अ·३
२९ ष्यस्यस गंधर्वाप्सरस्कस्यस हारण्येऽश्च पुत्रुभिर्यास्त्येऽव यन्मन्त्रा
त्मआत्मनि व्रतं तन्मे सर्वं व्रतमिदमहमग्ने सर्वव्रतो भवामि स्वाहे
ति समागनेव चेद्रुतिमस्त्वं सभिधाम्याद्ध्याद्ध्यावैनपूजयिष्यंतोभवं
तितत्रैतां रात्रीं वसेद्द्वियां तगुरुमर्थन निमंत्र्य कुलानुज्ञातस्य वास्नानं
तस्यैतानि व्रतानि भवंति नन नक्तं स्नायान्न नग्नः स्नायान्न भुंग्न शयीत न नं
ग्नां स्त्रियमीक्षेतान्यत्र मैथुनाद्वर्षति न धावेन्न वृक्षमवरोहेन्न कूपमवरोहे राम
न बाहुभ्यां नदीं तरेन्न शंसयमभ्यापद्येत महद्वै भूतस्नातको भवतीति वि २८
ज्ञायते ॥१॥ गुरुं चेमसक्षमाणो नामप्रब्रुवीतेद वत्स्यामो भो इत्युच्चैरूर्ध्व
र्ध्वं नाभ्नः प्राणापानयोरुरुव्यचा अमड्डैरिं द्रहरितिचातो ऽधोन्नपति प्राणा

सिरिभि

पाना। योरुरुव्यचाः स्तेयाम पद्ये देवाय सवित्रेप रिददामीत्यर्चं
चसमाप्यों प्राक् सस्तीतिजपित्वा महिंश्रीणामि त्यदमच्चौसमितिन
वस्पष्टस्यनकुतश्चिद्भयं भवतीति विज्ञायते॥ वयसामं नमे नो
ज्ञावाचस्तुत्वा कनिक्रदज्जनुषा प्रब्रुवाणइति सूक्तेऽजपेद्देवी
वाचमजनयंत देवा इति च स्तुहि श्रुतं गर्तसदं युवानमिति तिस
गस्य यस्या दिक्षो बिभीयाद्यस्मादुत्ता क्षिप्रमुल्मुकमुभयतः
प्राक्संप्रसस्येन्मे थवा प्रसव्य मालोड्याभयं मित्रावरुणा म
त्यमस्त्वर्चिषा त्रात्रून्दहंतं प्रतीत्य मा ज्ञातारं मा प्रतिष्ठां
विदंतु मिथो विघ्नाना उभयं तु मृत्युमितीति संसृष्टमुधन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म.सू. मुभयंसमारुतमितिमंथंन्यंचंकरोति ॥३०सर्वतोभयादन्ना अं०३
२९ द्यातादष्टावाज्याहुतीर्जुहुयात्पृथिवीरतासाग्निनार
तातयारतयावर्ज्यायस्माद्भयाद्बिभेमि तद्वारयेस्वाहा ॥अंत
रिक्षंरतंतद्वायुनारतंतेनरतेनवर्त्रेणयस्माद्भयाद्बिभेमितद्वारये
स्वाहा ॥द्योरता सादित्येनरतातयारतया व्यायस्माद्भया
द्बिभेमितद्वारयेस्वाहा ॥दिशोरतास्ताश्चंद्रमसारतास्ताभि
रताभिर्वर्त्रेभिर्यस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥आपोर ॥हेरंब
तास्तावरुणेनरतास्ताभिरताभिर्वर्त्रीभियस्माद्भयाद्बिभे २९
मितद्वारस्वाहा ॥प्रजारतास्ताःप्राणेनवृताहाभिरताभिर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=06.08.19 17:03
,TRANSFERRED=2019/08/06 at 17:12:24
,PAGES=30
,TYPE=STD
,NAME=S0001344
,Book Name=M-174-GRAHYSUTRA MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection